M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 54

Title: Ganga Sahasra

Skandapurana-Kashikhanda

Sdhe

54

Gangā Sahasra Incomplete

Gangā Stōtra : Title

Skandapurāna : Author

Kashikhanda : Editor

: Year, Vols.

: Publisher

54 (पौराणिक) : Remarks

Pages 1-9

॥श्रीगणेशायनमः॥ ॥श्रीगंगायैनमः॥ ॥अगस्तिरुवाच॥ ॥विनास्नानंनगंगाया
नृणांजन्मनिरर्थकं।उपायांतरमस्त्यन्यद्येनस्नानफलंभवेत्।१।अशक्तानांचपंगू
नामालस्योपहतात्मनां।दूरदेशांतरस्थानांगंगास्नानंकथंभवेत्।२।दानंवाथ
व्रतंवाथमंत्रंस्तोत्रंजपोथवा।तीर्थांतराभिषेकोवादेवतोपासनंतुवा।३।यद्यस्ति
किंचित्षडुक्तगंगास्नानफलप्रदं।विधानांतरमात्रेणतद्वदप्रणतायमे।४।त्वत्तोनवेद
स्कंदान्योगंगागर्भसमुद्भवः।परंस्वर्गतरंगिण्यामहिमानंमहामते।५।स्कंद उ॥ ॥
संतिपुण्यजलानीहसरांसिसरितोमुने।स्थानेस्थानेचतीर्थानिजितात्माध्युषि
तानिच।६।दृष्टप्रत्ययकारीणिमहामहिमवंत्यपि।परंस्वर्गतरंगिण्याःकोट्यं काशी॰गं॰
शोपिनतत्समं।७।अनेनैवानुमानेनबुध्यस्वकलशोद्भव।दध्रेगंगोत्तमांगेनद १

वदेवेनशंभुना।८।स्नानकालेन्यतीर्थेषुजप्यतेजाह्नवीजनैः।विनाविष्णुपदींका
न्यत्समर्थमघशोधने।९।गंगास्नानफलंब्रह्मन्गंगायामेवलभ्यते।यथाद्राक्षाफ
लस्वादोद्राक्षायामेवनान्यतः।१०।अस्त्युपायइहत्वेकःस्याद्येनाविकलंफलं।
स्नानस्यदेवसरितोमहागुह्यतमोमुने।११।शिवभक्तायशांतायविष्णुभक्तिपरा
यच।श्रद्धालवेत्वास्तिकायगर्भवासमुमुक्षवे।१२।कथनीयंनचान्यस्यकस्यचित्के
नचित्क्वचित्।इदंरहस्यंपरमंमहापातकनाशनं।१३।महाश्रेयस्करंपुण्यंमनोर
थकरंपरं।द्युनदीप्रीतिजननंशिवसंतोषसंतति।१४।नाम्नांसहस्रंगंगायाः
स्तवराजेषुशोभनं।जप्यानांपरमंजप्यंवेदोपनिषदांसमं।१५।जपनीयंप्रय
त्नेनमौनिनावाचकंविना।शुचिस्थानेषुशुचिनासुस्पष्टाक्षरमेववा।१६।श्रीस्कं

दत्तवाव॥ ॥ॐनमः श्रीगंगायै॥ ॥ॐकाररूपिण्यजराऽतुलाऽनंतामृतस्रवा॥अ
त्युदाराऽभयाऽशोकाऽलकनंदाऽमृताऽमला॥१७॥अनाथवत्सलाऽमोघाऽपांयोनिर
मृतप्रदा॥अव्यक्तलक्षणाऽक्षोभ्याऽनवच्छिन्नाऽपराजिता॥१८॥अनाथनाथाऽभीष्टार्थ
सिद्धिदाऽनंगवर्द्धिनी॥अणिमादिगुणाऽधाराऽग्रगण्याऽलीकहारिणी॥१९॥अचिंत्यश
क्तिरनघाऽद्भुतरूपाऽघहारिणी॥अद्रिराजसुताऽष्टांगयोगसिद्धिप्रदाऽच्युता॥२०॥अ
क्षुण्णशक्तिरसुदाऽनंततीर्थाऽमृतोदका॥अनंतमहिमाऽपाराऽनंतसौख्यप्रदाऽन्नदा
॥२१॥अशेषदेवतामूर्त्तिरघोराऽमृतवर्षिणी॥अविद्याजालशमनी ह्यप्रतर्क्यगतिप्र
दा॥२२॥अशेषविघ्नसंहर्त्री त्वशेषगुणगुंफिता॥अज्ञानतिमिरज्योतिरनुग्रहप
रायणा॥२३॥अभिरामाऽनवद्यांग्यनंतसाराऽकलंकिनी॥आरोग्यदाऽऽनंदवल्ली त्वा

काशी·गं·
२

पन्नार्त्तिविनाशिनी॥२४॥आश्चर्यमूर्त्तिरायुष्याऽऽढ्याऽऽद्याऽऽप्राऽऽर्यसेविता॥आप्यायिन्याप्तवि
द्याख्यात्वानंदाऽऽश्वासदायिनी॥२५॥आलस्यघ्न्यापदांहंत्री ह्यानंदामृतवर्षिणी॥इराव
तीष्टदात्रीष्टा त्विष्टापूर्त्तफलप्रदा॥२६॥इतिहासश्रुतीड्यार्था त्विहामुत्रशुभप्रदा॥इज्या
शीलसमिज्येष्ठा त्विंद्रादिपरिवंदिता॥२७॥इलालंकारमालेध्या त्विंदिरारम्यमंदिरा॥इं
दीरादिसुसंसेव्या त्वीश्वरीश्वरवल्लभा॥२८॥ईतिभीतिहरेड्या च त्वीडनीयचरित्रभृत्॥
उत्कृष्टशक्तिरुत्कृष्टोडुपमंडलचारिणी॥२९॥उदितांबरमार्गोस्रोरगलोकविहा
रिणी॥उक्षोर्वरोत्पलोत्कुंभा उपेंद्रचरणद्रवा॥३०॥उदन्वत्पूर्त्तिहेतुश्चोदारोत्साहप्र
वर्द्धिनी॥उद्वेगघ्न्युष्णशमनी ह्युष्णरश्मिसुताप्रिया॥३१॥उत्पत्तिस्थितिसंहारकारि
ण्युपरिचारिणी॥ऊर्जं वहंत्यूर्जधरोर्जावती चोर्मिमालिनी॥३२॥ऊर्ध्वरेतःप्रियोर्ध्वा

र्म्मिलोर्द्धगतिप्रदा। कृषिर्हंदसुतर्द्धिकरुणत्रयविनाशिनी।३३। कृतं नरर्द्धिदात्री चक्र
कस्वरूपाकृतुप्रिया। कृत्स्नमार्गविहर्त्री र्द्धिः रुजुमार्गप्रदर्शिनी।३४। एधिता खिल
धर्मार्थित्विकेकामृतदायिनी। एधनीयस्वभावैज्यालेजिताशेषपातका।३५। ऐश्व
र्यदैश्वर्यरूपास्येतिस्वं हैं दवीकृतिः। ऊर्जास्विन्योषधी देवमोजोदैहनदायिनी।
३६। ऊर्द्धामृतौत्तत्पदात्री त्वौषधं नवरोगिणां। औदार्यंचंबुरोपेंद्री त्वौग्री सौम्यरू
पिणी।३७। अंबराध्ववहांवष्टां बरमालांब [illegible] लगा। अंबिकांबुमहायो। निरंधोद्दां
धकहारिणी। अंशुमालासंशुमती। त्वंगीकृतषडानना।३८। अंधतामिस्रहंत्र्यं
धुरंजनास्यंजनावती। कल्याणकारिणी काम्पाकमलोत्पलगंधिनी।३९। कुम गं.स.
द्वती कमलिनी कांतिः कल्पितदायिनी। कांचनाक्षी कामधेनुः कीर्त्तिकृत्क्लेशना ३

नाशिनी।४०। कुंभश्रेष्ठा कृतफला कर्मबंधविभेदिनी। कमलाक्षी क्लमहरा कृशानुतम
नप्रकृतिः।४१। करुणार्द्रा च कल्याणी कलिकल्मषनाशिनी। कामरूपा क्रियाशक्तिः क
मलोत्पलमालिनी।४२। कूटस्था करुणा कांता कूर्म्मयाना कलावती। कमला कल्प
लतिका कालिकलुषवैरिणी। कमनीयजला कम्राकमर्दिमुकपर्दगा। कालकूटप्र
शमनी कदंबकुसुमप्रिया। कालिंदी केलिललिता कलकल्लोलमालिनी।४५। क्रांत
कें२ लोकत्रयाकंदूतनयवत्सला। खड्गिनी खड्गधाराभाखगाखंडेंदुधारिणी।४६। खेखेल
गामिनी खस्था खंडेंदुतिलकप्रिया। खेचरी खेचरीवंद्या —— ख्यातिप्रदायिनी।४७।
खंडितप्रणताघौघा खलबुद्धिविनाशिनी। खातैनः कंदसंदोहा खड्गखट्वांगखेटि
नी।४८। खरसंतापशमनी खनिः पीयूषपायसां। गंगा गंधवती गौरी गंधर्वनग

रप्रिया।४९।गंनीरांगी गुणमयी गतातंका।गतिप्रिया।गणनाथांबिका।गीता।गद्यप
द्यपरिष्टुता।५०।गांधारी गर्भशमनी।गतिभ्रष्टा।गतिप्रदा।गोमती गुह्यविद्या।गौर्गो
प्त्री गगनगामिनी।५१।गोत्रप्रवर्द्धिनी गुण्या।गुणातीता।गुणाग्रणी।गुहांबिका।गिरि
सुता।गोविंदांघ्रिसमुद्भवा।५२।गुणनीयचरित्रा।च गायत्री।गिरिशप्रिया।गूढरूपा
गुणवती गुर्वी गौरववर्द्धिनी।५३।ग्रहपीडाहरा।गुंद्रा।गरघ्नी।गानवत्सला।घर्महंत्री।
घृतवती घृततुष्टिप्रदायिनी।५४।घंटारवप्रिया।घोराघौघविध्वंसकारिणी।घ्राणतु
ष्टिकरी घोषा घनानंदा घनप्रिया।५५।घातुका घूर्णितजला घृष्टपातकसंततिः
।घटकोटिप्रपीतापा घटिताशेषमंगला।५६।घृणावती घृणिनिधिर्घस्मरा घूकना गं.स.
दिनी।घुसृणापिंजरतनुर्घर्घरा घर्घरस्वना।५७।चंद्रिका चंद्रकांतांबुः चंचला चपला ६

फतिः।चिन्मयी।चितिरूपा चंद्रायुतशतानना।५८।चांपेयलोचना चारुश्चार्वंगी।
चारुगामिनी।चार्या चारित्रनिलया चित्रकृच्चित्ररूपिणी।५९।चंपूश्चंदनशुच्यंबुः
चर्चनीया चिरस्थिरा।चारुचंपकमालाढ्या चमिताशेषदुष्कृता।६०।चिदाकाशावहा
चिंत्या चंचच्चामरवीजिता।चोरिताशेषवृजिना चरिताशेषमंडला।६१।छेदिताखिल
पापौघा छद्मघ्नी छलहारिणी।छन्नत्रिविष्टपतला छोटिताशेषबंधना।६२।छुरिता
मृतधारौघा छिन्नैनाः छंदगामिनी।छत्रीकृतमरालौघा छटीकृतनिजामृता।६३।जा
ह्नवी ज्या जगन्माता जप्या जंघालवीचिका।जया जनार्दनप्रीता जुषणीया जगद्धि
ता।६४।जीवनं जीवनप्राणा जगज्ज्येष्ठा जगन्मयी।जीवजीवातुलतिका जन्मिजन्म
निबर्हिणी।६५।जाड्यविध्वंसनकरी जगद्योनिर्जलाविला।जगदानंदजननी जलजा

जलजेक्षणा।६९।जननलोचनपीयूषाजटानटविहारिणी।जयंतीजंजपूकघ्नीजनित॥
ज्ञानविग्रहा।६७।झल्लरीवाद्यकुशलाझल्लज्जलाहृता।झिंटीवंद्याझंकारका
रिणीझझरावती।६८।टीकिताखिलपाताला।टंकिकैतोद्रिपाटने।टकारनृत्यत्क
ल्लोलाटीकनीयमहातटा।६९।डंबरप्रवहोड्डीनराजहंसकुलाकुला।डमड्डुमरुहस्ता
चडामरोक्तमहाउंका।७०।ढोकिताशेषनिर्वाणा ढक्कानादचलज्जला।ढुंढि॥
विघ्नेशजननीटणाटुणितपातका।७१।तर्प्पणीतीर्थतीर्थात्रिपथात्रिपथेश्व
री।त्रिलोकगोप्त्रीतोयेशीत्रैलोक्यपरिवंदिता।७२।तापत्रितयसंहर्त्रीतेजोब
लविवर्द्धिनी।त्रिलक्ष्यातारणीतारातारापतिकरार्चिता।७३।त्रैलोक्यपावनीपु मं०स०
ण्यातुष्टिदातुष्टिरूपिणी।तृष्णाछेत्रीतीर्थमातात्रिविक्रमपदोद्भवा।७४।तपो॥ ५

मयीतपोरूपातपस्तोमफलप्रदा।त्रैलोक्यव्यापिनीतृप्तिस्तृप्तिकृत्तत्त्वरूपिणी।
।७५।त्रैलोक्यसुंदरीतूर्याशुर्य्यातीतपदप्रदा।त्रैलोक्यलक्ष्मीस्त्रिपदीतथ्यात्ति
मिरचंद्रिका।७६।तेजोगर्भातपःसारात्रिपुरारिशिरोगृहा।त्रयीस्वरूपिणीतन्वीत
पनांगजभीतिनुत्।७७।तरिस्तरणिजामित्रंतर्प्पितोशेषपूर्वजा।तुलाविरहिता
तीव्रपापतूलतनूनपात्।७८।दारिद्र्यदमनीदक्षादुःप्रेक्षा।दिव्यमंडला।दीक्षा
वतीदुरावाप्याद्राक्षामधुरवारिभृत्।७९।दर्शितानेककुतुकादुष्टदुर्जयदुःख
हृत्।दैन्यहृद्दुरितघ्नीचदानावारिपदाम्बुजा।८०।दंदशूकविषघ्नीचदारिता
घौघसंततिः।द्रुतादेवद्रुमछन्नादुर्वाराघविघातिनी।८१।दमग्राह्यादेवमाता॥
देवलोकप्रदर्शिनी।देवदेवप्रियादेवीदिक्पालपददायिनी।८२।दीर्घायुःकारि

णी दीर्घदिग्घ्री हृषणवर्जिता । दुग्धांबुवाहिनी दोह्या दिव्या दिव्यगतिप्रदा ।८३
। द्युनदी दीनशरणं देहिदेहनिवारिणी । द्राघीयसी दाघहंत्री दितपपातकसं
ततिः ।८४। दूरदेशांतरचरी दुर्गमा देववल्लभा । दुर्वृत्तघ्नी दुर्विगाह्या दयाधारा द
यावती ।८५। दुरासदा दानशीला द्राविणी द्रुहिणस्तुता । दैत्यदानवसंशुद्धिकर्त्री दु
र्बुद्धिहारिणी । दानसारा दयासारा द्यावाभूमीविगाहिनी ।८७। दृष्टादृष्टफलप्रा
प्तिर्देवतावृंदवंदिता । दीर्घव्रता दीर्घदृष्टिर्दीप्ततोया दुरालभा ।८८। दंडयित्री दंड
नीतिर्दुष्टदंडधरार्चिता । दुरोदरघ्नी दावार्चिर्द्रवद्द्रव्यैकशेवधिः ।८९। दीनसं
तापशमनी दात्री दवथुवैरिणी । दरीविदारणपरा दांता दांतजनप्रिया ।९० का॰गं॰
। दारिताद्रितटा दुर्गा दुर्गारण्यप्रचारिणी । धर्मद्रवा धर्मधुरा धेनुर्धीरा धृ ६

ति ध्रुवा ।९१। धेनुदानफलस्पर्शा धर्मकामार्थमोक्षदा । धर्मोर्मिवाहिनी धुर्या
धात्री धात्रीविभूषणा ।९२। धर्मिणी धर्मशीला च धन्विकोटिकृतावना । ध्यातृपाप
हरा ध्येया धावनी धूतकल्मषा ।९३। धर्मधारा धर्मसारा धनदा धनवर्धिनी । ध
र्माधर्मगुणच्छेत्री धत्तूरकुसुमप्रिया ।९४। धर्मेशी धर्मशास्त्रज्ञा धनधान्यसमृ
द्धिकृत् । धर्मलभ्या धर्मजला धर्मप्रसवधर्मिणी ।९५। ध्यानगम्यस्वरूपा च धरणी
धातृपूजिता । धूर्धूर्जटिजटासंस्था धन्या धीर्धारणावती ।९६। नंदा निर्वाणजन
नी नंदिनी नुन्नपातका । निषिद्धविघ्ननिचया निजानंदप्रकाशिनी ।९७। नभोंग
णचरी नूतिर्नम्या नारायणी नुता । निर्मला निर्मलाख्याना नाशिनी तापसंप
दां ।९८। नियता नित्यसुखदा नानाश्चर्यमहानिधिः । नदी नदसरोमाता नायि

कानाकदीर्घिका।९९।नष्टोदरा।धीरा।चनंदा।नानंददायिनी।निर्णिक्ताशेष
भुवना।निःसंगा।निरुपद्रवा।१००।निरालंबा।निःप्रपंचा।निर्नाशितमहामला॥
निर्मलज्ञानजननी।निःशेषप्राणितापहृत्।१।नित्योत्सवा।नित्यतृप्ता।नमस्कार्या
निरंजना।निष्टावती।निरातंका।निर्लेपा।निश्चलात्मिका।१०२।निरवद्या।निरीहा।च
नीललोहितमूर्धगा।नंदिभृंगिगणस्तुत्या।नागा।नंदा।नगात्मजा।३।निःप्रत्यू
हा।नाकनदी।निरयार्णवदीर्घनौः।पुण्यप्रदा।पुण्यगर्भा।पुण्या।पुण्यतरंगिणी॥
४।पृथुःपृथुफला।पूर्णा।प्रणतार्तिप्रभंजनी।प्राणदा।प्राणिजननी।प्राणेशी
प्राणरूपिणी।५।पद्मालया।पराशक्तिःपुरजित्परमप्रिया।परा।परफलप्राप्तिः।पावनी।च।पयस्विनी।५।परानंदा।प्रकृष्टार्था।प्रतिष्ठा।पालिनी।परा।पुराणप

गं॰स॰
७

विता।प्रीता।प्रणवाक्षररूपिणी।६।पार्वतीप्रेमसंपन्ना।पशुपाशविनाशिनी॥
परमात्मस्वरूपा।च।परब्रह्मप्रकाशिनी।परमात्मस्वरूपा।च।परब्रह्मप्रकाशिनी
।७।परमानंदनिस्पंदा।प्रायश्चित्तस्वरूपिणी।पार्वतीप्रेमसंपन्ना।पशुपाशविनाशि
नी।८।परमात्मास्वरूपा।च।परब्रह्मप्रकाशिनी।परमानंदनिस्पंदा।प्रायश्चित्तस्व
रूपिणी।९।पानीयरूपनिर्वाणा।परित्राणपरायणा।१०।पापेंधनदवज्वाला
पापारिःपापनामनुत्।परमैश्वर्यजननी।प्रज्ञा।प्राज्ञा।परावरा।११।प्रत्यक्षल
क्ष्मीःपद्माक्षी।परव्योमामृतस्रवा।प्रसन्नरूपा।प्रणिधिःपूता।प्रत्यक्षदेवता।१२
।पिनाकिपरमप्रीता।परमेष्ठीकमंडलुः।१३।पद्मनाभपदार्घ्येण।प्रसूता।पद्म
मालिनी।१३।परर्धिदा।पुष्टिकरी।पथ्या।पूर्तिः।प्रभावती।पुनाना।पीता।गर्भघ्नी।पा

पपर्वतनाशिनी।१४।फलिनी फलहस्ता चफुल्लांबुजविलोचना।फालितैनोमहाशि

त्राफणिलोचका।१५।विन्नषणं।१५।फेनच्छन्नप्रणुन्नैना:फुल्लकेशरगंधिनी।फेनि

लाछांबुधाराफुडुच्चाटितपातका:।१६।फाणितस्वादुसलिलाफांटपथ्यजलावि

ला।विश्वमाताचविश्वेशी विश्वाविश्वेश्वरप्रिया।१७।ब्रह्मण्याब्रह्मकृद्ब्राह्मीब्रह्मिष्ठावि

मलोदका।विभावरीच विरजाविक्रांतानेकविष्टपा।१८।विश्वमित्रंविष्णुपदीवैष्णवीवै

ष्णवप्रिया।विरूपाक्षप्रियकरीविभूतिर्विश्वतोमुखी।१९।विपाशावैबुधीविद्याबेदा

क्षररसस्रवा।विद्योवगापवती वंद्याबृंहणीब्रह्मवादिनी।२०।बरदाविप्रकृष्टाचवरि

ष्ठाचविशोधिनी।विद्याधरीविशोकाचवयोवृंदनिषेविता।२१।बहूदकाबलवतीव्यो गं·स·

मस्थाविबुधप्रिया।वाणीवेदवतीवित्ताब्रह्मविद्यातरंगिणी।२२।ब्रह्मांडकोटिव्या ८

प्तांबुर्ब्रह्महत्यापहारिणी।ब्रह्मेशविष्णुरूपाचबुद्धिर्विभववर्द्धिनी।२३।विलासिसुखदावा

स्याव्यापिनीचवृषारणि:।वृषांकमौलिनिलयाविपन्नार्तिप्रभंजिनी।।२४।विनीता

विनताब्रध्नतनयाविनयान्विता:।विपंचीवाद्यकुशलावेणुश्रुतिविचक्षणा।२५।वर्चस्क

रीबलकरीबलोन्मूलितकल्मषा।विपाप्माविगतातंका,विकल्पपरिवर्जिता।२६।

वृष्टिकर्त्रीवृष्टिजलाविधिर्विच्छिन्नबंधना।व्रतरूपावित्तरूपाबहुविघ्नविनाशकृत्।

२७।वसुधारावसुमतीविचित्रांगीविभावसु:।विजयाविश्वबीजंचवामदेवीवरप्रदा।२

८।वृषाश्रिताविषघ्नीचविज्ञानोर्म्यंशुमालिनी [illegible] वनी [illegible] शांतवानीनृतम्भा

वनी।२९।नृतधात्रीनयहरानक्षदारिप [illegible] प्रदानेत्रीनकस्वर्गा

पवर्गदा।३०।नागीरथीनानुमतीनापंके [illegible] प्रेयानबद्धिन्नृति

दान्नतिदूषणा।३१।नालजलोचन[illegible]दिना। कुन्द्रा[illegible]लोचनात्रांतिज्ञानप्रशमनी
भिन्नब्रह्माऽजमंडपा।३२।नूरिदानक्तिसुलभ[illegible]प्रण[illegible]वह कुन्द्वकेरी।।त्वं ज्जितोपप्लवकु
लाऽनन्दसन्नोज्यसुखप्रदा।३३।निद्राणीयाविद्[illegible]नाम[illegible]शिवस्वरूपिणी।मंदा।कि   ग।
नीमहानंदामातामुक्तितरंगिणी।३४।महोदयामधुमतीमहापुण्यामुदाकरी।मु
नित्रुतामोहहंत्रीमहातीर्थमिधुम्रवा।३५।माधवीमानिनीमान्यामनोरथप
था।तिगा।मोक्षदामतिदामुख्यामहानागपज्ञनाश्रिता।३६।महावेगवतीमेध्या
महामहिमभूषणा।महाप्रभावामहतीमीनचंचललोचना।३७।महाकारुण्यसंपू
र्णामहर्द्धिश्चमहोत्पला।मूर्त्तिसिन्मुक्तिरमणीमणिमाणिक्यभूषणा।३८।मुक्ताक   गं.स.
लापनेपथ्यामनोनयननंदिनी।महापातकराशिघ्नीमहादेवार्द्धधारिणी।३९।   ९